# Apaduddharaka Hanuman Stotram

अस्य श्रीहनुमत्स्तोत्रमहामन्त्रस्य विभीषण ऋषिः अनुष्टुप् छन्दः महारुद्रावतारी श्रीहनुमान् देवता शत्रुबाधानिवारणार्थे सर्वकार्यसिद्ध्यर्थे च जपे विनियोगः ॥

**ध्यानम्**

चन्द्राभं चरणारविन्दयुगलं कौपीनमौञ्जीधरं
नाभ्यां वै कटिसूत्रयुक्तवसनं यज्ञोपवीतावृतम् ।
हस्ताभ्यामवलम्ब्य चाञ्जलिमथो हारावली कुण्डलं
बिभ्रद्दीर्घशिखं प्रसन्नवदनं दिव्याञ्जनेयं भजे ॥

आपन्नाखिललोकार्तिहारिणे श्रीहनूमते ।
अकस्मादागतक्लेशनाशनाय नमोऽस्तु ते ॥ १ ॥

सीतावियुक्तश्रीरामशोकदुःखभयापह ।
तापत्रयार्तिशमन दैत्यापह नमोऽस्तु ते ॥ २ ॥

आधिव्याधिमहामारीग्रहपीडाप्रहारिणे ।
प्राणापहन्त्रे दैत्यानां रामप्राणात्मने नमः ॥ ३ ॥

संसारसागराज्ञानभ्रमिविभ्रान्तचेतसाम् ।
शरणागतमर्त्यानां शरण्याय नमोऽस्तु ते ॥ ४ ॥

राजद्वारे प्रयाणे च प्रवेशे शत्रुसङ्कटे ।
गजसिंहव्याघ्रचोरभीषणेऽध्वनि कानने ।
प्रपन्नार्तिविनाशाय वाय्वात्मज नमोऽस्तु ते ॥ ५ ॥

प्रदोषे वा प्रभाते वा ये स्मरन्त्यञ्जनीसुतम् ।
अर्थसिद्धिः यशः कीर्तिः प्राप्नुयुर्नाऽत्र संशयः ॥ ६ ॥

कारागृहे प्रयाणे च सङ्ग्रामे देशविप्लवे ।
ये स्मरन्ति हनूमन्तं तेषां नैव विपत्तयः ॥ ७ ॥

वज्रदेहाय कालाग्निरुद्रायामिततेजसे ।
दुष्टदैत्यमहादर्पज्वालनाय महात्मने ।
ब्रह्मास्त्रस्तम्भनायास्मै नमः श्रीरुद्रमूर्तये ॥ ८ ॥

जप्त्वा स्तोत्रमिमं मन्त्रं वसुवारं जपेन्नरः ।
राजद्वारे सभास्थाने प्राप्तवादे जयो ध्रुवम् ॥ ९ ॥

विभीषणेन प्रोक्तं च यः पठेत् सततं नरः ।
सर्वापद्भ्यो विमुच्येत नात्र कार्या विचारणा ॥ १० ॥

॥ इति शिवम् ॥

asya śrīhanumatstotramahāmantrasya vibhīṣaṇa ṛṣiḥ anuṣṭup chandaḥ mahārudrāvatārī śrīhanumān devatā śatrubādhānivāraṇārthe sarvakāryasiddhyarthe ca jape viniyogaḥ ||

**dhyānam**

candrābhaṃ caraṇāravindayugalaṃ kaupīnamaunjīdharaṃ
nābhyāṃ vai kaṭisūtrayuktavasanaṃ yajnopavītāvṛtam |
hastābhyāmavalambya cānjalimatho hārāvalī kuṇḍalaṃ
bibhraddīrghaśikhaṃ prasannavadanaṃ divyānjaneyaṃ bhaje ||

āpannākhilalokārtihāriṇe śrīhanūmate |
akasmādāgatakleśanāśanāya namo.astu te || 1 ||

sītāviyuktaśrīrāmaśokaduḥkhabhayāpaha |
tāpatrayārtiśamana daityāpaha namo.astu te || 2 ||

ādhivyādhimahāmārīgrahapīḍāprahāriṇe |
prāṇāpahantre daityānāṃ rāmaprāṇātmane namaḥ || 3 ||

saṃsārasāgarājnānabhramivibhrāntacetasām |
śaraṇāgatamartyānāṃ śaraṇyāya namo.astu te || 4 ||

rājadvāre prayāṇe ca praveśe śatrusaṅkaṭe |
gajasiṃhavyāghracorabhīṣaṇe.adhvani kānane |
prapannārtivināśāya vāyvātmaja namo.astu te || 5 ||

pradoṣe vā prabhāte vā ye smarantyanjanīsutam |
arthasiddhiḥ yaśaḥ kīrtiḥ prāpnuyurnā.atra saṃśayaḥ || 6 ||

kārāgṛhe prayāṇe ca saṅgrāme deśaviplave |
ye smaranti hanūmantaṃ teṣāṃ naiva vipattayaḥ || 7 ||

vajradehāya kālāgnirudrāyāmitatejase |
duṣṭadaityamahādarpajvālanāya mahātmane |
brahmāstrastambhanāyāsmai namaḥ śrīrudramūrtaye || 8 ||

japtvā stotramimaṃ mantraṃ vasuvāraṃ japennaraḥ |
rājadvāre sabhāsthāne prāptavāde jayo dhruvam || 9 ||

vibhīṣaṇena proktaṃ ca yaḥ paṭhet satataṃ naraḥ |
sarvāpadbhyo vimucyeta nātra kāryā vicāraṇā || 10 ||

|| iti śivam ||

www.kamakotimandali.com